[1]परिच्छेदोपाधिकायां सङ्ख्यायां वर्तमानात् किमः प्रत्ययो विज्ञायते । का सङ्ख्या [2]परिमाणमेषां ब्राह्मणानाम् कति ब्राह्मणाः, [3]कियन्तो ब्राह्मणाः । अथ वा सङ्ख्यैव परिमाणात्मिका [4]परिच्छेदस्वभावा गृह्यते, का सङ्ख्या [5]परिमाणं येषाम् इति । ननु च सङ्ख्या एवमात्मिकैव परिच्छेदस्वभावा, सा किमर्थं [6]परिमाणेन [7]विशेष्यते ? यत्रापरिच्छेदकत्वेन विवक्ष्यते तत्र मा भूदिति । क्षेपे हि परिच्छेदो नास्ति, केयमेषां सङ्ख्या दशानाम् इति ॥

## सङ्ख्याया अवयवे तयप् । (४२/१८४३)

तदस्य इत्येव । सङ्ख्याया अवयवे वर्तमानायाः अस्य इति षष्ठ्यर्थे तयप् प्रत्ययो भवति । [8]अवयवावयविनः सम्बन्धिनः इति सामर्थ्यात् अवयवी प्रत्ययार्थो [9]विज्ञायते । पञ्च अवयवा यस्य [10]पञ्चतयम् । दशतयम् । चतुष्टयम् । चतुष्टयी[11] ॥

## द्वित्रिभ्यां तयस्यायज्वा । (४३/१८४४)

पूर्वेण[12] विहितस्य तयस्य द्वित्रिभ्यां [13]परस्य वा अयजादेशो भवति । द्वौ अवयवौ अस्य द्वयम्, द्वितयम् । त्रयम्, त्रितयम् । [14]तयग्रहणं स्थानिनिर्देशार्थम् । अन्यथा प्रत्ययान्तरमयज् विज्ञायेत । [15]तत्र को दोषः ? त्रयी गतिः इति [16]तयनिबन्धन ईकारो (४.१.१५/४७०) न स्यात्, 'प्रथमचरमतयाल्पार्धकतिपयनेमाश्च' (१.१.३३/२२६) [17]इत्येष विधिर्न स्यात् । द्वये । [18]द्वयाः । चकारः स्वरार्थः ॥

## उभादुदात्तो नित्यम् । (४४/१८४५)

उभशब्दात् परस्य तयपो नित्यमयजादेशो भवति, स चोदात्तः । [19]वचनसामर्थ्यादादेरुदात्तत्वं विज्ञायते । [20]उभशब्दो यदि लौकिकी सङ्ख्या ततः पूर्वेणैव विहितस्य तयप [21]आदेशविधानार्थं वचनम् । अथ न सङ्ख्या, ततो योगविभागेन तयपं विधाय तस्य नित्यमयजादेशो विधीयते । उभयो [22]मणिः । 'उभयेऽस्य देवमनुष्याः' (तै.सं. १.६.८.१) ॥

## तदस्मिन्नधिकमिति दशान्ताड्डः । (४५/१८४६)

तत् इति प्रथमासमर्थात् अस्मिन् इति सप्तम्यर्थे दशान्तात् प्रातिपदिकात् डः प्रत्ययो भवति यत् तत्प्रथमासमर्थमधिकं चेत् तद् भवति । इतिकरणस्ततश्चेद् विवक्षा । एकादश अधिका अस्मिन् शते एकादशं शतम् । एकादशं सहस्रम् । द्वादशं शतम् । द्वादशं सहस्रम्[23] । दशान्तात् इति किम् ? पञ्च अधिका अस्मिन्[24] शते । अन्तग्रहणं किम् ? दशाधिका अस्मिन् शते ।

---

1. परिच्छेदात्मिकायाम् क. 2. परिमाणं नास्ति क.ड.ह. 3. कति गुणिनः फ. 4. परिच्छेदात्मिका क.फ, परिच्छेदिका ह. 5. परिमाणं नास्ति क. 6. परिमाणग्रहणेन ब.क.ड.फ.ह. 7. विशिष्यते क. 8. अवयवा अवयविनमपेक्ष्य भवन्ति इति सामर्थ्यात् अवयवी प्रत्ययार्थो विज्ञायते ह, अवयवा अवयवसम्बन्धिनः इति सामर्थ्यात् क. 9. अपि इत्यधिकम् फ. 10. पञ्चतयः दशतयः फ. 11. रज्जुः इत्यधिकम् ब.क.ड. 12. यो विहितः तयप् तस्य ग. फ. 13. उत्तरस्य ग. 14. तयब्ग्रहणम् क. 15. तत्र – द्वयाः नास्ति फ. 16. तयब्निबन्धनः ह. 17. इति चैव ह. ड. 18. द्वयाः नास्ति फ. 19. वचन – विधीयते नास्ति ह. 20. तच्छब्दो लौकिकी क. 21. आदेशार्थम् फ, आदेशविधानवचनम् क. 22. देवमणिः क. 23. त्रयोदशं शतम् इत्यधिकम् फ.ह, त्रयोदशम् इत्यधिकम् क.ड. 24 शब्दे ह.